# Kailasasabhasu Nrittavarnanam 5

# कैलाससभासु नृत्तवर्णनम् ५

## Document Information

Text title : Kailasasabhasu Nrittavarnanam 5

File name : kailAsasabhAsunRRittavarNanam5.itx

Category : shiva, shivarahasya

Location : doc_shiva

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | mAheshvarAkhyaH prathamAMshaH | adhyAyaH 33 - sabhAsu nRittavarNanam | 64-76||

Latest update : December 17, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 20, 2023

*sanskritdocuments.org*

# कैलाससभासु नृत्तवर्णनम् ५

(सूतकृतं सभाधीश्वर शिवस्तवः ५)

श्रीसूतः-
तटिन्निभजटाभटीपटुरिटीड्यवागर्भटी-
निटालककृपीडकं भज भजामहे धूर्जटिम् ।
शिवं कटतटारटद्यमकठोरतुण्डाभटी-
चपेटिवरशूलकं करटिचर्मशोभत्पटम् ॥ ६४॥

हटात्कृतशठासुरमसुखभेदकृत्तीरट-
द्विपाठशरधारिणं कमठपृष्टपादं शिवम् ।
भजामि जठरीधृतत्रिजगन्मूलपीठोस्थित-
जनार्दनपटुस्तवं हृदि सुनिष्ठितं योगिनाम् ॥ ६५॥

कुठारवरधारिणं कुमुदनाथचूडामणिं
कुरङ्गवरभूषणं भजत नीलकण्ठं सदा ॥ ६६॥

उत्कोशकाशितमहाशिवरातखेटनीलोऽच्छताच्छसुकरोरुशिरोधरांसम् ।
रक्षस्मृतिप्रजनितापगतादिसञ्ज्ञापस्मारमौलिपदपङ्कजनिं भजामि ॥ ६७॥

नादोत्थडम्बरमहाडमरुप्रकाण्डमुत्फुल्लपङ्कजवरानलमीशितारम् ।
आरात् प्रणेमुरमरा रजताचलस्थं केक्याखुवाहगणपैः परमेशमेवम् ॥ ६८॥

नन्दीशभृङ्गिरिटियस्मुरनन्दिकसोमनन्दिचण्डीशतुण्डवरहुण्डतुहुण्डभद्राः ।
श्रीबाणरावणगणाननकोटिचण्डा ब्रह्मा हरीश्वरमुखा अमरेन्द्रसङ्घनाः ॥ ६९॥

स्तम्भैर्विद्रुमपुत्रिकौघघटितैर्हैमैर्महामातृकैः
भास्वत्स्वावरणैश्च शक्तिभिरपि प्रोद्दण्डमायामये ।
रङ्गे सर्वजगत्करण्डमखिलं यस्येक्षणाज्जृम्भते
यस्यैवेक्षणतश्च रक्षितमिदं तत्रैव लीनं क्षणात् ॥ ७०॥

सोऽप्येतादृशरङ्गमण्डपगतस्सर्वैश्च भूतैर्वृतो

रुद्राणीसहितो गणेशगुहयुक्पार्श्वे सुरेन्द्रैरपि ।
पाथोजास्त्रभवेन श्रीधरभवैरन्वास्यमानश्शिवो-
रुद्राणीगणपैश्च सेवितपदो मोदान्वितो रङ्गगः ॥ ७१ ॥

ईषत्पादतलाहतित्रुटितभूभागासहिष्णुत्रुट-
त्स्फूर्जत्कर्पटशर्मदर्विधमहाकूर्मस्तवाम्रेडितम् ।
अङ्गुल्यग्रपतत्तदीयपवनोत्क्षिप्तस्वधामस्थिर-
ब्रह्माण्डं परमेशितुर्विजयते नृत्तं समस्ताद्भुतम् ॥ ७२ ॥

नम्रान्पाणिगणान्दिशावधिकृते स्वीयान्कपर्दानपि
व्योमान्ते नतिकुञ्चितामपि पुनः पातालमुख्यानधः ।
लोकाख्यान् समतीत्य स्वीयचरणान्कुर्वन्निरालम्बनो
नृत्तं केवलमीश्वरो वितनुते देव्यग्रतः केवलम् ॥ ७३ ॥

सभासु च सभापतिर्हरिहिरण्यगर्भादिभिः
सनन्दनसनातनैर्हरमुनन्दिनन्यादिभिः ।
कराहतिमहामणिप्रवरमद्दलादुत्थितः
सुतालवरकल्पनैर्नटति नृत्तरङ्गस्थितः ॥ ७४ ॥

वेदाधीश्वर वेद एव भगवन्भक्त्या त्वदीयास्सभा
नौति स्तौति भवन्तमेव हि ततो देवं सभाधीश्वरम् ।
वेदो वेद न वेदरूपमपि ते नीरूपरूपः कथं
तस्मादेवमहो महेश्वर सदा वाचानिवृत्तस्त्वयि ॥ ७५ ॥

प्रोवाचावचनेन रूपमपि ते ज्ञातुं न शक्यं परैः ॥ ७६ ॥

॥ इति शिवरहस्यान्तर्गते माहेश्वराख्ये कैलाससभासु नृत्तवर्णनम् ५ - सूतकृतं सभाधीश्वर शिवस्तवः ॥

- ॥ श्रीशिवरहस्यम् । माहेश्वराख्यः प्रथमांशः । अध्यायः ३३ - सभासु नृत्तवर्णनम् । ६४-७६ ॥

- .. shrIshivarahasyam . mAheshvarAkhyaH prathamAMshaH . adhyAyaH 33 - sabhAsu nRRittavarNanam . 64-76..

Notes:

Sūta सूत renders a eulogising prayer to Śiva शिव (the Sabhādhīśvara सभाधीश्वर) at Kailāsa कैलास, where He conducts His Dance Divine, that is witnessed by Devī देवी, Skanda स्कन्द, Gaṇeśa गणेश, Nandi नन्दि, Bhṛṅgi भृङ्गि, Riṭi रिटि et al.

Encoded and proofread by Ruma Dewan

*Kailasasabhasu Nrittavarnanam 5*

pdf was typeset on December 20, 2023

Please send corrections to *sanskrit@cheerful.com*